# .. siddhasarasvatIstotram ..

# ॥ સિદ્ધસરસ્વતીસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : siddhasarasvatIstotram

File name : siddhasarasvatIstotram.itx

Location : doc_devii

Author : svAmi shrImaheshvarAnanda sarasvatI

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sanjay Khandelwal ksanjay209 at yahoo.co.in

Proofread by : Sanjay Khandelwal, NA

Latest update : November 1, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 1, 2016

*sanskritdocuments.org*

# ॥ સિદ્ધસરસ્વતીસ્તોત્રમ્ ॥

સૌન્દર્યમાધુર્યસુધાસમુદ્રવિનિદ્રપદ્માસનસન્નિવિષ્ટામ્ ।
ચઞ્ચદ્વિપઞ્ચીકલનાદમુગ્ધાં શુદ્ધાં દધેઽન્તર્વિસરત્સુગન્ધામ્ ॥ ૧॥

શ્રુતિઃસ્મૃતિસ્તત્પદપદ્મગન્ધિપ્રભામયં વાઙ્મયમસ્તપારમ્ ।
યત્કોણકોણાભિનિવિષ્ટમિષ્ટં તામમ્બિકાં સર્વસિતાં શ્રિતાઃ સ્મઃ ॥ ૨॥

ન કાન્દિશીકં રવિતોઽતિવેલં તં કૌશિકં સંસ્પૃહયે નિશાતમ્ ।
સાવિત્રસારસ્વતધામપશ્યં શસ્યં તપોબ્રાહ્મણમાદ્રિયે તમ્ ॥ ૩॥

શ્રીશારદાં પ્રાર્થિતસિદ્ધવિદ્યાં શ્રીશારદામ્ભોજસગોત્રનેત્રામ્ ।
શ્રીશારદામ્ભોજનિવીજ્યમાનાં શ્રીશારદાઙ્કાનુજનિં ભજામિ ॥ ૪॥

ચક્રાઙ્ગરાજાઞ્ચિતપાદપદ્માં પદ્માલયાઽભ્યર્થિતસુસ્મિતશ્રીઃ ।
સ્મિતશ્રિયા વર્ષિતસર્વકામા વામા વિધેઃ પૂરયતાં પ્રિયં નઃ ॥ ૫॥

બાહો રમાયાઃ કિલ કૌશિકોઽસૌ હંસો ભવત્યાઃ પ્રથિતો વિવિક્તઃ ॥

જગદ્વિધાતુર્મહિષિ ત્વમસ્માન્ વિધેહિ સભ્યાન્નહિ માતરિભ્યાન્ ॥ ૬॥

સ્વચ્છવ્રતઃ સ્વચ્છચરિત્રચુઞ્ચુઃ
    સ્વચ્છાન્તરઃ સ્વચ્છસમસ્તવૃત્તિઃ ।
સ્વચ્છં ભવત્યાઃ પ્રપદં પ્રપન્નઃ
    સ્વચ્છે ત્વયિ બ્રહ્મણિ જાતુ યાતુ ॥ ૭॥

રવીન્દુવહ્નિદ્યુતિકાટિદીપ્રં સિંહાસનં સન્તતવાદ્યગાનમ્ ।
વિદીપયન્માતૃકધામ યામઃ કારુણ્યપૂર્ણામૃતવારિવાહમ્ ॥ ૮॥

શુભ્રાં શુભ્રસરોજમુગ્ધવદનાં શુભ્રામ્બરાલઙ્કૃતાં
શુભ્રાઙ્ગીં શુભશુભ્રહાસ્યવિશદાં શુભ્રસ્રગાશોભિનીમ્ ।
શુભ્રોદ્દામલલામધામમહિમાં શુભ્રાન્તરઙ્ગાગતાં
શુભ્રાભાં ભયહારિભાવભરિતાં શ્રીભારતીં ભાવયે ॥ ૯॥

મુક્તાલઙ્કૃતકુન્તલાન્તસરણિં રત્નાલિહારાવલિં
કાઞ્ચીકાન્તવલગ્નલગ્નવલયાં વજ્રાઙ્ગુલીયાઙ્ગુલિમ્ ।
લીલાચઞ્ચલલોચનાઞ્ચલચલલ્લોકેશલોલાલકાં
કલ્યામાકલયેઽતિવેલમતુલાં વિત્કલ્પવલ્લીકલામ્ ॥ ૧૦॥

પ્રયતો ધારયેદ્ યસ્તુ સારસ્વતમિમં સ્તવમ્ ॥

સારસ્વતં તસ્ય મહઃ પ્રત્યક્ષમચિરાદ્ ભવેત્ ॥ ૧૧॥

વાગ્બીજસમ્પુટં સ્તોત્રં જગન્માતુઃ પ્રસાદજમ્ ॥

શિવાલયે જપન્ મર્ત્યઃ પ્રાપ્નુયાદ્ બુદ્ધિવૈભવમ્ ॥ ૧૨॥

સૂર્યગ્રહે પ્રજપિતઃ સ્તવઃ સિદ્ધિકરઃ પરઃ ।
વારાણસ્યાં પુણ્યતીર્થે સદ્યો વાઞ્છિતદાયકઃ ॥ ૧૩॥

પાદામ્ભોજે સરસ્વત્યાઃ શઙ્કરાચાર્યભિક્ષુણા ।
કાશીપીઠાધિપતિના ગુમ્ફિતા સ્રક્ સમર્પિતા ॥ ૧૪॥

ઇતિ કાશીપીઠાધીશ્વરજગદ્ગુરુ શઙ્કરાચાર્ય સ્વામિ
શ્રીમહેશ્વરાનન્દ સરસ્વતી વિરચિતં
શ્રીસિધ્દ્સરસ્વતીસ્તોત્રં સમાપ્તમ્ ।

કાશીપીઠાધીશ્વરજગદ્ગુરુ શઙ્કરાચાર્ય સ્વામિ
શ્રીમહેશ્વરાનન્દ સરસ્વતી વિરચિત યહ સિધ્દ્સરસ્વતીસ્તોત્ર
અત્યન્ત મહત્વપૂર્ણ હૈ । ઉન્હોંને ઇસ સ્તોત્ર કે પ્રત્યેક શ્લોક
મેં માતા સરસ્વતી કા વર્ણન કરતે હુએ ઉનકી મહિમાઓં કા વર્ણન
કિયા હૈ । જો પ્રાણી મન્દિર મેં ઇસ સ્તોત્ર કા જપ યા પાઠ કરતા
હૈ ઉસે બુદ્ધિ એવં વૈભવ કી પ્રાપ્તિ હોતી હૈ, સૂર્યગ્રહણ કે
અવસર પર જો ઇસકા જપ કરતા હૈ, ઉસે સિદ્ધિ કી પ્રાપ્તિ હોતી
હૈ । વારાણસી જૈસે પુણ્યતીર્થ મેં જો ઇસકા પાઠ કરતે હૈં,
વે સબ કુછ પ્રાપ્ત કરતે હૈં । પ્રત્યેક દૃષ્ટિકોણ સે યહ
સ્તોત્ર અત્યધિક મહત્વપૂર્ણ હૈ ।

Encoded by Sanjay Kahandelwal ksanjay209 at yahoo.co.in
Proofread by Sanjay Khandelwal, NA

.. siddhasarasvatIstotram ..
was typeset using XƎLATEX 0.99996

on November 1, 2016

Please send corrections to *sanskrit@cheerful.com*